**Journal of Veda Samskrita Academy**
**ISSN 2250-1711**
**Volume XVI : July to December – 2020**

# जैनाराधनामण्डलानामेकमध्ययनम्

**विदुषी तेजस्विनी डि. (मैसूरु)***

यः कर्मरूपिशत्रून् १ जितवान् तं जैनधर्मे 'अरिहन्ता' २ इति सम्बोध्य तस्योपदेशेनैव विश्वं तथैव मोक्षमार्गमवगम्य तस्यानुयायिनः तमेवाराधितवन्तः । 'तत्त्वार्थसूत्रम्' इति ग्रन्थे आचार्य उमास्वामी एवमवदत्–

मोक्षमार्गस्यनेतारं, भेतारंकर्मभूभृतां ।
ज्ञातारंविश्वतत्त्वानांवन्देतद्गुणलब्धये" ॥

जितस्य / जिनस्य अनुयायिनः जैनाः अभवन् । जैनधर्मे गुणानामाराधना भवति न तु व्यक्तेः । अरिहन्तारम् उपदेशानुसारेण सर्वजीविषु आत्मा वर्तते । यदा स आत्मा परमात्मस्वरूपं प्राप्नोति तदा चतुर्गतिरिति ३ विद्यमानजीवनचक्रात् बहिरागच्छति स एव मोक्षः इति ।

शिवकोट्याचार्यः 'मूलाराधना' इति ग्रन्थे आराधनाविषये एवमुल्लिखति- 'व्यवहारदृष्ट्या सम्यग्दर्शनज्ञानचारित्राणि नाम रत्नत्रयाणि आराध्यवस्तूनि परं शुद्धनिश्चयदृष्ट्या परमात्मा एव आराध्यवस्तु । आत्माराधनायाः प्रवृत्तिः अथवा क्रिया आराधनमिति कथ्यते' इति । अपि च कथितं–संसिद्धि, राध, सिद्ध, साधित, आराधित एते पर्यायवाचीशब्दाः । आत्मा यः राधरहितभवति सः अपराधी तथैव चैतन्ययुतआत्मा अपराधीन भवति । सः तु शङ्कारहितो भूत्वा स्वात्मानम् अवगम्य आराधनायां सर्वदा निरतः भवति इति शिवकोटिआचार्यः स्वस्य ग्रन्थे सूचितवन्तः ।

---

१. ज्ञानावरणीय, दर्शनावरणीय, वेदनीय, मोहनीय, आयु, नाम, गोत्र, अन्तरायमिति अष्टकर्माणि ।
२. अरि = शत्रु + हन्ता = नाशितवान् ।
३. देव, मनुष्य, तिर्यञ्च, नरक इति चत्वारः गतयः ।

पद्मनन्द्याचार्यः तस्य पञ्चविंशति ग्रन्थे एवमलिखत्–

आत्मैकः सोपयोगो मम किमपि ततो नान्यदस्तीति चिन्ता–

भ्यासास्ताशेषवस्तोः स्थितपरममुदायद्गतिर्नोविकल्पे ।

ग्रामे वाकाननेवाजनजनितसुखे निःसुखे वा प्रदेशे

साक्षादाराधना सा श्रुतविशदमतेर्बाह्यमन्यत्समस्तम् ॥

यः साधुः आगमाभ्यासेन निर्मलः सन् मोहं जित्वा सर्वेषु विषयेषु सर्वेषु क्षेत्रेषु च बाह्याभ्यन्तरे समानः भवति सा एव 'आराधना' इति कथ्यते इति पद्मनन्द्याचार्यः अकथयत् । अत्र आराधना शब्दः जैनपारिभाषिकशब्दः इति वक्तुं शक्यते । अभिधानचिन्तामणौ आराधनाशब्दस्य 'शुश्रूषाऽऽराधनोपास्ति वस्यापरिष्टयः' इति कथयित्वा शुश्रूषा, आराधना, उपासना, वरिवस्या, पर्येषणा एते उपचारस्य पर्यायवाचिनः शब्दाः इति सूचितम् । अमरकोशे 'आराधनं साधनेस्यादवाप्तौ तोषणेऽपि च' इति उक्तम् । अत्र आराधना इत्युक्ते साधना, आत्मतुष्टीकरणं, पूजा इति ।

**आराधनायाः विधाः-**

षोडशशतमानस्य भट्टारकमल्लिभूषणस्वामिनां शिष्यः स्वर्गीय ब्रह्मचारी श्रीनेमिदत्तेन विरचित आराधनाकथाकोशे आराधनाशब्दस्य विवरणमित्थं प्रतिपादितम्–

सम्यग्दर्शनबोधवृत्ततपसां संसारविच्छेदिनां

शक्त्याभक्तिभरेणसद्गुरुमतात्स्वर्गापवर्गश्रिये ।

उद्योतद्यमनेतथाचनितरांनिर्वाहणंसाधनं ।

पूतैर्निस्तरणंमहामुनिवरैरागाधनेतीरिता ॥ ९ ॥

सम्यग्दर्शनज्ञानचारित्रतपाः संसारविच्छेदनार्थं / नाशनार्थं कारणीभूताः । अतः

---

४. मूलाराधना, श्लोक-३०४, ३०५

संसिद्धिराधसिद्धंसाधियमाराधियचएयट्ठं । अवगयराधोजोखलुचेयासोहोइअवराधो ॥ ३०४ ॥

जोपुणणिरवराधोचेयाणिस्संकिओउसोहोइ । अवराहणाएणिच्चंवट्टेइअहतिआणंतो ॥३०५ ॥



स्वर्गमोक्षादीनां सुखं प्राप्तुं भक्त्या शक्त्यानुसारेण उद्योत–उद्यमन–निर्वाहण–साधन–निरस्तरणकरणमेव आराधना इति आचार्यः अवदत् । अत्र उद्योत इति चेत् – सम्यग्दर्शनज्ञानचारित्रतपसा लोके प्रकाशनमेव उद्योतः । आलस्यं विना स्वीकृतपसां बाह्याभ्यन्तरेण पालनार्थं प्रयत्नः करणम् उद्यमनम् । स्वीकृतसम्यग्दर्शनादि व्रतपालनसमये सङ्कष्टाः आवृतापि अपरित्यज्य पालनं निर्वाहणं भवति । रागेण विना तत्त्वार्थादि शास्त्रग्रन्थान् समग्रमध्ययनं साधनम् । स्वीकृतं चारित्रम् आजीवनं निर्विघ्नतया पालनं निस्तरणम् । एवं प्रकारेण पूर्वाचार्याः आराधनायाः पञ्च प्रकारान् अवोचयन् ५ ।

**मण्डलानां रचनायाः विधाः (चूर्ण–धान्य–वस्त्रविशेषैः)**

जैनाराधना विधानसङ्ग्रहे मण्डलम् यन्त्र नाम्ना अपि सम्बोधितम्६ । यन्त्रं तु चूर्णयन्त्रं, गन्धयन्त्रं, लोहयन्त्रं, चन्द्रोपकयन्त्रमिति चतुर्विधम् ।

**चूर्णयन्त्रम्**

भूमिं स्वच्छं कृत्वा पीठे तण्डुलचूर्णं, हरिद्रा, कुङ्कुममित्यादिभिः यन्त्ररचनकरणं चूर्णयन्त्रमिति कथ्यते । बहुषु स्थलेषु तण्डुलचूर्णेभ्यः हरिद्रा, हरित्, रक्तवर्णं, कृष्णवर्णमित्यादि मेलयित्वा तेन यन्त्ररचनां कुर्वन्ति । श्वेत, पीत, हरित्, रक्त, कृष्णवर्णान्नेव यन्त्ररचनार्थमुपयोक्तव्यम् । यन्त्रं तु चतुरस्रं भवितव्यम् । अत्र विषम सङ्ख्यया विशालत्वं भवितव्यं न तु समसङ्ख्यया ।

आराधना क्रमात् वृत्ताकारेण कमलदलं विरच्य तस्य चतुर्षु दिक्षु द्वारं रचयित्वा स्वस्तिकां लिखन्ति । नन्तरं पञ्चकर्णिकाः रचयित्वा तेषु श्वेत, पीत, हरित्, रक्त, कृष्णवर्णाः पूरयन्ति । तदनन्तरं पृथ्वीमण्डलस्य रेखां रचयन्ति ।

---

५. आराधनाकथाकोशः, रचयिता स्व. ब्रहमचारी श्रीनेमिदत्तः, सं. स्व. श्री उदयलालकाशलीवाल, प्र. ब्र. मदीबाई, दिगम्बर जैनसमाज, नागौर, राजस्थान, १९७२

६. जैन आराधना विधान सङ्ग्रहः, परिशिष्ट भाग-३

चतुर्षु कोनेषु ४-४ भाण्डाः उपरि-उपरि स्थापयन्ति । ८ कुम्भाः, मङ्गलाष्टकाः, ८ आयुधाः, ८ पताकाः अष्ट दिक्षु स्थापयन्ति । पञ्चवर्णस्य सूत्रेण एतान् त्रिवारं बन्धयन्ति । भाण्डकुम्भयोः अधः तण्डुलान् विस्तार- यन्ति । मण्डल/यन्त्रस्य चतुर्षु कोनेषु चत्वारि स्थम्भान् स्थापयित्वा तस्य पुरतः नारिकेलः, इक्षु, कदली फलानि स्थापयित्वा तस्य शोभां वर्धयन्ति । यन्त्रस्य मध्यभागे कलशं संस्थाप्य तस्मिन् गन्धयन्त्रं स्थापयन्ति ।

**गन्धयन्त्रम्-**

समतल स्थालिकायां श्रीगन्धचन्दनञ्च कुङ्कुम, केसरि, कर्पूरमिश्रणैः मिश्रयित्वा लेपनं कुर्वन्ति । लेपः यदा शुष्कत्वं प्राप्नोति तदा शलाकया यन्त्ररचनां कृत्वा दलेषु देवानां नामानि लिखन्ति । मध्ये वृत्तौ कर्तुः नामं नक्षत्रेण सार्धं विलिख्य पञ्चामृत अभिषेकसमये तस्योपरि तीर्थङ्करमूर्ति, श्रुत, गुरुमूर्ति च संस्थाप्य अभिषेकं कुर्वन्ति । तदनन्तरं चूर्णयन्त्रस्य मध्ये कुम्भस्योऽपरि स्थापयित्वा १०८ मन्त्रपुष्पैः क्षेपयन्ति ।

**लोहयन्त्रम्-**

केचन यन्त्रान् देवालये स्थापयन्ति । केचन यन्त्रान् भुजौ, कण्ठे धारयन्ति । तान् यन्त्रान् ताम्र, सुवर्ण, रजतपत्रेषु गन्धयन्त्रमिव देवानां नामानि विलिख्य शुभसमये प्राणप्रतिष्ठां, ४८ दिनानि पञ्चामृत अभिषेकं च कुर्वन्ति । १०८ मन्त्रपुष्पान् संस्थाप्य कलारोपणं कृत्वा चूर्णयन्त्रस्य मध्ये कुम्भस्योपरि स्थापितं गन्धयन्त्रे स्थापयित्वा १०८ आराधनां कुर्वन्ति । तदा तत् यन्त्रं पूर्णशक्तिं परिशुद्धतां च प्राप्नोति ।

**चन्द्रोपकयन्त्रम्-**

श्वेतवस्त्रे गन्ध-चन्दन-हरिद्रां मेलयित्वा यथा चूर्णयन्त्रे लिखितं तथा तथा यन्त्रं लिखन्ति । इदं चूर्णयन्त्रस्योपरि चतुर्षु स्थम्भेषु प्रसार्य सूत्रेण बन्धयन्ति । अस्मात् कारणात् यदि यत्किमपि कीटाः, धूलिः चूर्णयन्त्रस्योपरि पतनावकाशः न भवति । इदं यन्त्रं अन्ययन्त्राणां शुद्धत्वं शुचित्वं च रक्षति । अद्यतन दिनेषु केचन चन्द्रोपकयन्त्रं वस्त्रमध्ये आराधना मण्डलानि विरच्य तस्योपरि एव आराधनां कुर्वन्ति ।



**धान्ययन्त्रम् -**

नैकेषु प्रदेशेषु धान्यैः अपि मण्डलं पूरयित्वा आराधनां कुर्वन्ति । ईदृशी पद्धतिः कर्नाटके तावत् न दृश्यते परन्तु उत्तरप्रदेश, मध्यप्रदेशेषु अस्य प्राशस्त्यमधिकमस्ति ।

**पञ्चचूर्णस्थापनम्**

पञ्चवर्णैः मण्डललेखनसमयेऽपि शुद्धाः भूत्वा भक्त्या मण्डलं रचयन्ति । ॐ श्वेतपीतहरितारुणकृष्णमणिचूर्णं स्थापयामि स्वाहा इति उच्चारयन्तः पञ्चचूर्णानि स्थापनार्थं सिद्धाः भवन्ति । ॐ नागराजाय अमिततेजसे स्वाहा । श्वेतचूर्णस्थापनम् । ॐ हेमप्रभाय धनदाय अमिततेजसे स्वाहा । पीतचूर्णस्थापनम् । एवमेव ॐ हरित्प्रभाय मम शत्रुमथनाय स्वाहा इति उक्त्वा नील अथवा हरिद्वर्णं स्थापनीयम् । ॐ अरुणप्रभाय मम सर्ववशङ्कराय वषट् स्वाहा इति उच्चारयित्वा रक्तचूर्णं स्थापनीयम् । ॐ कृष्णप्रभाय मम शत्रुवशङ्कराय घे घे स्वाहा इति वदन्तः कृष्णचूर्णस्थापनं करणीयम् । जैनाः २४ तीर्थङ्करान् वर्तमानकाले आराधयन्ति । तेषां वर्णमपि श्वेत, पीत, हरित्, रक्त, कृष्णवर्णैः दर्शयन्ति । आदिनाथ, अजितनाथ, शम्भव, अभिनन्दन पीतवर्णशरीरं प्राप्तवन्तः आसन् । सुमतिनाथः हरित्वर्णे, पद्मप्रभ रक्तवर्णे, सुपार्श्वनाथ पीतवर्णे, चन्द्रप्रभ-पुष्पदन्तौ श्वेतवर्णे, शीतलनाथ-श्रेयांसनाथौ पीतवर्णे, वासुपूज्य रक्तवर्णे, विमल, अनन्त, धर्म, शान्ति, कुन्थु, अर, मल्लि पीतवर्णे, मुनिसुव्रत कृष्णवर्णे, नमिनाथ पीतवर्णे, नेमिनाथ कृष्णवर्णे, पार्श्वनाथ हरितवर्णे, वर्धमानं पीतवर्णे दर्शयन्ति ७ ।

**मण्डलशब्दनिष्पत्तिः, विवरणञ्च-**

आराधनामण्डलानि इत्यस्मिन् शब्दे मण्डलमिति चेत् मडिधातोः कलच् प्रत्यये निष्पन्नः मण्डलमितिशब्दः । अस्य च प्रकारः, वृत्तः, रेखाभिः रचितपदार्थः (सर्वतोभद्र, सूर्यमण्डल, भूमण्डल इत्यादि) इति पद्मनन्दिकोशे कथितम् ।

---

७. नवग्रहशान्ति, जिनेन्द्र आराधना, पृ. -२०९

जैनधर्मानुसारेण मण्डलमिति शब्दः नानार्थं सूचयति । 'सूर्यप्रज्ञप्ति' इत्यस्मिन् ग्रन्थे चतुर्विंशतितमतीर्थङ्कर महावीरस्वामि-गौतमस्वामिनोः संवादः वर्तते । तत्र गौतमस्वामी महावीरस्वामिनं मण्डलशब्दस्य विषये पप्रच्छ । तदा महावीरः नानार्थप्रतिपादकः मण्डलशब्दः इति कथयन् एषः शब्दः रूढ्यर्थवाचकोऽपि इति अकथयत् । सूर्यप्रज्ञप्तिग्रन्थानुसारेण जम्बूद्वीपे सूर्योऽस्व १८४ मण्डलेषु भ्रमणं कुरुतः । सूर्यः दक्षिणात् पूर्वं प्रति बाह्य मण्डलैः आभ्यन्तरमण्डलानां प्रत्यागच्छति इति निर्दिष्टम् । अत्र मण्डल शब्दस्य वृत्ताकारयुतमेकं स्थलमिति वक्तुं शक्यते । सूर्यमण्डलस्य ज्ञानं ज्योतिषशास्त्रमपि द्योतयति । अस्मिन् शास्त्रे सूर्यगतिं एकम् अहोरात्रि इति परिगणितम् । अत्र विद्यमानाक्षरेषु अ त्रि इत्यक्षरौ निष्कासितौ चेत् होरा इति अक्षरद्वयमवशिष्यते । ज्योतिषशास्त्रं होराशास्त्रमित्यपि प्रसिद्धम् ।

मण्डलशब्देन सार्धं यदा आराधनाशब्दं योजयामश्चेत् अयं शब्दः विशेषतया मोक्षमार्गं सूचयति । साधकः गुरुभिः उपदिष्टं मोक्षमार्गमवगम्य स्वस्य कर्मनिर्जरार्थं मन्डलाराधनां करोति । सिद्धचक्राराधना, भक्तामरआराधना, श्रुतनोम्पि आराधना इत्यादि नानाविधमण्ड- लाराधनानि जैनधर्मे कथितानि । तीर्थङ्करस्य उपदेशश्रवणार्थं यदा देवैः समवसरणस्य८ रचना कृता तदा देवेन्द्रः शचीदेव्या सह तत्रागत्य समवसरणस्य मध्यभागे विद्यमानं तीर्थङ्करं पूजादिविशेषैः नमस्करोति । शचीदेवी रत्नैः तत्र विद्यमानं रङ्गवल्लीं विस्तारयति इति जिनसेनाचार्यकृतमहापुराणे उल्लिखितम् । साधकोपि समवसरणस्य तादृशीमेव कल्पनां मनसि निधाय मण्डलं विरच्य तस्मिन् तीर्थङ्करस्य प्रतिष्ठापनां कृत्वा तं तस्य गुणान् च आराधयन् मोक्षमार्गे गन्तुं प्रयतते ।

अत्र आराधनामण्डलमिति चेत् बाह्यात् आभ्यन्तर स्थितमात्मानं प्रतिसाधकं नेतुम् एकं साधनमिति वक्तुं शक्यते । इदं स्पष्टीकर्तुं नैके आचार्याः अनेकान् प्रतिष्ठाग्रन्थान् अरचयन् । तथैव ईदृशैः आराधनैः कर्मनिर्जरां कृतवतां श्रावक–श्राविकानां प्रसिद्धकथाः आराधनाकथाकोश, नोम्पियकथेगळु इत्यादि ग्रन्थेषु सङ्गृहीतः । तीर्थङ्करैः उपदिष्टमुपदेशं श्रुतमित्युच्यते । इमान् उदेशान् गणधराः चतुर्दशपूर्वरूपेण अन्येभ्यः उपदिष्टवन्तः ।

-----------------------------------------------------------------------------------------------------------

८. समेत्यावसारोप्रेक्षास्तिष्ठन्त्यस्मिन् सुरासुराः......... ॥ महापुराण, आश्वासः, ३३-७३



चतुर्दशपूर्वेषु विद्यानुवादोपि एकः । अस्मिन् क्षेत्र, श्रेणी, लोकप्रतिष्ठा, संस्थान, समुद्घातान् वर्णितमस्ति । अत्र आराधनाविषयः अपि पाठितः ।

## मण्डलशब्दस्य विवरणम्

देवालयं मानवस्य शरीरेण सार्धं तुलनां कुर्वन्ति । शक्तिः एका व्यूहः इति आमनन्ति । शक्तेः व्यवस्था एव मण्डलम् । मानवस्य शरीरः इतस्ततः चलनशीलमण्डलं चेत् देवालयः एकत्र स्थित अचल मण्डलम् । तन्त्रे मानचदेहस्य मण्डलस्य प्रामुख्यता वर्तते चेत् आगमे दैवीशक्तेः मण्डलस्य प्राधान्यं भवति ९ । योगतत्त्वोपनिषदि मण्डलस्य सङ्केतं पञ्चमहाभूतानां आधारेण विवृणन्ति । तत्र पृथवी तत्त्वस्य आकृतिः चच्चौकमिति, आपस्तत्त्वस्य सङ्केतः अर्धवृत्तं, तेजसः सङ्केतः त्रिकोणः, वायुतत्त्वस्य सङ्केतः षट्कोण, आकाशतत्त्वस्य सङ्केतः वृत्तमिति कथितम् । औन्नत्यविस्तरणं विना एषः सर्वशक्तेः केन्द्रमिति कथितम् । गर्भान्तरे स्थितमर्चामूर्ति बिन्दोः स्थाने वर्तते ।

विश्वकर्ममण्डलस्य विषये महाभारते कथितमस्ति । विश्वकर्मस्य पञ्चपुत्राः । तेषु प्रथमः मनु । एषः मनुष्येषु प्रथमः । मयः द्वितीयः । एषः धर्मराजस्यसभां निर्मितः । एषः जानपदस्य स्थपतिः । तृतीयः त्वष्टृ शिल्पिः । लोहकर्मः चतुर्थः । एषः सीवनं, मृत्तिकया पुत्थलिकरणे निपुणः । अन्तिमः अर्क अथवा विश्वज्ञः । एषः सुवर्णरजतकार्ययोः कुशलः । एते मिलित्वा देवालयं निर्मितवन्तः । अतः देवालये ५ देवाः, ५ गुणाः, ५ आकारः भवन्ति । इदं विश्वकर्ममण्डलं ध्योतयति १० ।

प्रा. एस्. के. रामचन्द्रराव् मण्डलविषये एवमपि अचिन्तयन् - सूर्यचन्द्रयोः प्रकाशमावृतं वायुः वायुमण्डलम् । इदं विश्वमावृत्य प्रकाशं प्रयच्छति इति कल्पना वर्तते । विश्वस्य समष्टेः सङ्केतः मण्डलम् ।

-----------------------------------------------------------------------------------------------------------

९. ¨Ágvz zÃªÁ®AiÄ £¯ : »£Ä¯, ¥ÄI ¸ASÉ-117

१०. पञ्च आकाराः गुणाश्च-१ त्रिकोण-तामस, २. चच्चौक-ज्ञान, वृत्ता-क्रिया, षट्कोणः- त्रीणि मेलयित्वा, अष्टकोण-शुद्धसत्व. ¨Ágvz zÃªÁ®AiÄ £¯ : »£Ä¯, ¥ÄI ¸ASÉ-119

अतः इदं सामान्यतया वृत्ताकारमेव भवति इति चिन्तयन्ति । वृत्तमित्युक्ते पूर्णम् । इदं सर्वं स्वस्मिन् स्थापयति । प्रायः मण्डलस्य प्रथम आकारः अण्डमिव आसीत् । अतः ब्रह्माण्ड अथवा हिरण्यगर्भः इति साङ्केति कमभूत् । मेरुः वृत्ताकारे अस्ति । तस्य परितः विद्यमानाः चतस्रः दिशाः वृत्तस्य परितः वृत्तमेवकृतचच्चौकः । वास्तु मण्डलय अयमेव आकारः । अस्य ब्रह्मभागः मेरुपर्वतः । देवालयस्य बहिः चौकाकार गर्भगृहमेव मण्डलम् । गर्भगृहस्य उपरि यः विमानः वर्तते सः मेरुपर्वतस्यस्थूलस्वरूपः । विमानस्य रचनायां विश्वकर्ममण्डलस्य नैकाः आकाराः अन्तर्भवन्ति । वास्तुमण्डले वास्तुपुरुषस्य अवयवोपरि विद्यमान देवैः सार्धं एतेषां सादृश्यं सम्बन्धश्च वर्तते ११ । गर्भगृहस्य अन्तः प्रवेशः इति चेत् मण्डलस्य अन्तः प्रवेशः । भक्तस्य देवालस्य अन्तः प्रवेशः इति चेत् लोकधर्मात् शिवधर्मस्य अन्तः प्रवेशः १२ । वैष्णवागमे गर्भगृहः दैवी शक्तिस्वरूपः । सः एव अर्चा । तस्य अन्तः विद्यमानः मूर्तिः अन्तर्यामि । प्रति प्राणिषु विद्यमान दैवसानिध्यं हृदयम् । गर्भगृहस्योपरि विद्यमानः विमानः दैवी शक्तेः विभवस्वरूपं प्रतिपादयति । विमानस्योपरि स्थापित कलशः “व्यूह”स्य अभिव्यक्तिः । कलशस्योपरि स्थापित स्तूपि दैविशक्तेः ’पर’ इति प्रकारः इति कथितवन्तः१३ ।

**आराधनायाः महत्वम्**

नैकाः जैनाचार्याः आराधनायाः महत्वं कथयन्तः अपभ्रंश संस्कृत, प्राकृत भाषासु नैकाः ग्रन्थाः रचिताः । श्रीनयनन्दी अभयसूरिः, महेश्वरसूरिः, अमितगति आचार्यः, समयसुन्दराचार्यः, सोमसूरिः ’आराधना’ इति, ग्रन्थं रचयित्वा आराधनायाः महत्वं दर्शितवन्तः ।

मल्लिभुषण, श्रुतसागरः, ब्रह्मनेमिदत्तः, प्रभाचन्द्रः, सिंहनन्दी,

---

११. ¨Ágvz zÃªÁ®AiÄ £¯ : »£Ì¯, ¥Ä¤ ¸ASÉ-1२६

१२. ¨Ágvz zÃªÁ®AiÄ £¯ : »£Ì¯, ¥Ä¤ ¸ASÉ-१३०, १३१

१३. ¨Ágvz zÃªÁ®AiÄ £¯ : »£Ì¯, ¥Ä¤ ¸ASÉ-१३३



चत्रसेन, ब्रह्मदेव, रत्नकीर्ति इत्यादयः नैकाः आचार्यमुनिपण्डिताश्च “आराधनाकथाकोशः” इति ग्रन्थं व्यरचयन् १४ । जैनधर्मीयाः आराधनामण्डलानि नैमित्तिकपूजासुयोजयित्वा सन्दर्भानुसारेण व्रतादिकं स्वीकृत्य मण्डलाराधनां कुर्वन्ति । ईदृशानां मण्डलाराधनानां चित्राणि जैनदेवालयेषु, मठेषु च द्रष्टुं शक्यते । स्थूलरूपेण सूक्ष्मरूपिणः आत्मनः सिद्ध्यर्थं आराधनामण्डलानि मानवायसहायको भवति ।

जैनधर्मे आराधनामण्डलानि प्रतिपादयितुम् नैकानिशिलाशासनानि उपलभ्यन्ते । एतानि संशोधनाक्षेत्रे ऐतिहासिकधाराः । तथैव नैकाः प्रतिष्ठाग्रन्थान्, पूजाग्रन्थान् रचितवन्तः । जिनसेनकृता ‘धर्मरत्नाकरः’ (१०००शतमाने), वसुनन्देः ‘प्रतिष्ठासार-सङ्ग्रहः’, नेमिचन्द्र विरचित ‘प्रतिष्ठातिलकम्’ (सप्तमशतमानः), पं. आशाधरेण विरचिताः ‘प्रतिष्ठासारोद्धारः’ (त्रयोदशशतमानं), भट्टाकलङ्ककृत ‘प्रतिष्ठाकल्पः’ इत्यादि प्रतिष्ठाग्रन्थाः तथैव ८००शततमे वर्षे विरचितम् ‘आराधनाकर्णाटटीका’, चतुर्मुखकविना अपभ्रंशायां विरचितं ‘पउमचरिय’ (सप्तमेशतमाने), रत्नशेखरसूरिणा रचितं ‘श्रीपालचरिते’ (चतुर्दशशतमाने) इत्यादि ग्रन्थेषु काव्येषु च जैनाराधनामण्डलानां विषये विवृतम् । कार्कळप्रदेश विद्यमानस्य जैनदेवालयस्य मानस्तम्भे, मूडुबिदरे क्षेत्रे विद्यमानं साविरकम्बदबसदिमध्ये स्थितेषु स्तम्भेषु च मण्डलानां चित्राणि उद्धृतानि ।

तथैव पुरातनगुहमन्दिरेषु, जैनमठेषु च समवसरणमण्डलानां चित्राणि चित्रितानि । नानासमये नानास्थले चारित्रिक, राजनैतिकक्षेत्रेषु च सम्बद्धमण्डलानामाराधना अद्य पर्यन्तं प्रचलिता वर्तते । उत्तर भारत, मध्यभारत प्रदेशेषु मण्ड लाकारेण जिनदेवालयान् निर्मितवन्तः । उदाहरणतया हस्तिनापुरे आर्यिका ज्ञानमती कमलमन्दिरम्, सहस्रकूटमन्दिरं, त्रिलोकमन्दिरं, जम्बूद्वीपमन्दिरमित्यादि मन्दिराणि लोकस्य आकारे निर्मापितवती ।

---

१४. जिनरत्नकोश, हरिदामोदर वेलन्कर्, भण्डर्कर ओरियण्टल् रिसर्च् इन्स्टिट्यूट्, पूना-१९४४

जैनाराधनामण्डलेषु उपयुक्तानि पञ्चवर्णमयचूर्णानि चतुर्विंशति तीर्थङ्कराणां देहवर्णं प्रतिपादयति । कानिचन ग्रन्थेषु ईदृशानि वर्णमयमण्डलानि रङ्गवल्लि, यन्त्र, मन्डल, **बलि** इत्यादि शब्धैः व्यवहृतम् । क्षेत्रविशेषेण ईदृशानि आराधनामण्डलानि विशेषतया स्वस्य महत्वं स्वयमेव प्रतिपादयति । आत्मानं परमात्मकरणमेव जैनानां सिद्धान्तः । एवं सति पुराणादि ग्रन्थेषु भरतचक्रवर्तिनम् आरभ्य अद्य पर्यन्तं जैनचिह्नानि पुञ्ज–मन्डल–समवसरण इत्यादि रुपेण जनान्आध्यात्मक्षेत्रे आकर्षयदस्ति ।

**आराधना–**

आराधनाशब्दः पूजा इति शब्दस्य व्याप्तौ भवति । जैनग्रन्थेषु आर्याणां षट्कर्माणि कथितानि ।

**'इज्यां वार्तां च दत्तिञ्च स्वाध्यायं संयमं तपः ।**

**श्रुतोपासकसूत्रत्वात्सतेभ्यः समुपादिशत् ॥**

श्रावकाचारसूत्रश्रवणात्तस्मै श्रावकै ईज्या , वार्ता, दत्ति, स्वाध्याय, संयमश्च बोधितम् । धवलाग्रन्थे पूजा शब्दम् एवं विवृतं-"एदाहि सह अ इंदघ्रय-कप्परुक्ख-महामह-सव्वदोभद्दादि महिमाविहाणं पूजा"१५ इति विवृत-मस्ति । अर्हतपरमे श्वरस्य पूजां ईज्या इति कथ्यते । विशुद्धाचरणात् स्थूलरूपि हिंसा न भवेत्यथा तथा कृष्यादिकरणं वार्ता । दया , पात्रा, सम, अन्वयमिति दानकरणस्य चतुर्विधाः । तेभ्यः दत्ति इति कथ्यते । शास्त्रविषये चिन्तनं स्वाध्यायः । उपवासादिनियमेभ्यः तप इति कथ्यते । अहिंसादि व्रताचरणं संयमः ।

इज्यायां पञ्च विधपूजाः कथिताः १६ –

१. देवेन्द्रैः क्रियमाणपूजा' महा– महाइन्द्रध्वज'।

२. महामुकुटबद्धैः राज्ञैः या पूजा क्रियते सा 'सर्वतोभद्रपूजा'

---

१५. धवला-८, ओघानुगम, खण्ड-३, ४२ गाथा, पृ-९२

१६. महापुराण, सर्गः-३८, श्लोकः, २७-३३



३. चक्रवर्तिभिः जगतः इच्छां यया दानेन पूर्यते तस्याः पूजायाः नाम 'कल्पद्रुमपूजा'।

४. महामहामाण्डलीकैः क्रियमाणा पूजा 'महापूजा'।

५. स्वशक्त्या स्वगृहे जिनगृहे च अष्टविधद्रव्यैः क्रियमाणपूजा 'अष्टविधार्चनपूजा'।

भारते जैनधर्मीयाः मण्डलं विरच्य तीर्थङ्कराणामाराधनां कुर्वन्ति । मण्डलाराधने नैकाः प्रकाराः सन्ति । सन्दर्भानुसारेण मण्डलं विरच्य मध्ये तीर्थङ्कराणां बिम्बं संस्थाप्य समवसरणमिति मनसि निधाय मोक्षमार्गे गमनार्थं स्वात्मानं स्वतन्त्रयितुं च तीर्थङ्कराणां गुणगानं कुर्वन्ति, तादृशगुणान् साधकः अपि प्राप्तुं प्रयतति । अतः मण्डलाराधानाक्रमः प्रसिद्धः वर्तते ।

**विदुषी तेजस्विनी डि.**
**शोधच्छात्रा**
**कर्नाटकसंस्कृतविश्वविद्यालयः**
**चामराजपेटे,**
**बेङ्गळूरु-**560018, **कर्नाटक**
**Mobil : 9845614502**
**Email : jangdatejaswini71@yahoo.com**

( **विदुषी तेजस्विनी डि** . महाभागा बेङ्गळूरुमहानगरे विराजमानस्य कर्नाटकसंस्कृतविश्वविद्यालयस्य प्राध्यापकानां **डा. वेङ्कटरमण** महोदयानां मार्गदर्शनेन **"जैनाराधनमण्डालानाम् एकमध्ययनम्"** इत्यस्मिन् विषये संशोधनकर्मणि रता ।)

******